ISSN: 2583-5149 | An online refereed and peer reviewed journal | Frequency: Biannual

अभिनवधारा
ABHINAVDHARA
International Journal of Innovation in Indic Studies
www.ijiis-org.com

Vol-3, Issue-2 | July 2024

# ब्राह्मणग्रन्थेषु प्रतिपाद्यविषयाः

डा. श्रीधरभट्ट ऐनकै
प्राध्यापकः
संस्कृतम् तथा वेदविज्ञानविभागः
श्रीसत्यसायिमानवाभ्युदयविश्वविद्यानिलयः कलबुरगि, कर्नाटकराज्यम्

वेदो अखिलो धर्ममूलम् (मनुस्मृतिः२-६) इति स्मृतिवचनम्। मन्त्रब्राह्मणयोः वेदनामधेयम् (आप,श्रौ,सू,३१) इति श्रौतसूत्रेषु निर्दिश्यते।तर्हि वेदः इत्युक्तौ ज्ञानार्थकः विद्धातोःघञ् प्रत्ययबलेन निष्पन्नत्वात् ।ज्ञानविज्ञानराशिः वेदशब्दःबहुषु अर्थेषु समालक्ष्यते सनातनसंस्कृतवाङ्मये। विद् सत्तायाम्, विद विचारणे, विदलृ लाभे, विद् चेतनाख्याननिवासेषु इति धातुबिन्नत्वेनापि घञि वेदशब्दः प्रयुज्यते।एवम् विचार्यमाणे सति वेदाःज्ञानराशित्वात् शाश्वतस्थायिनः,ज्ञाननिधयः,मानवहितप्रापकाः,मानवानाम् कर्तव्यबोधकाः इति विविधधात्वर्थग्रहणात् अभिगम्यते।

अपारपारावाररूपज्ञानविज्ञानोत्करःवेदः इत्यनेन ज्ञायते यत् विविधसंस्कृतेः मूलम् इति वा,इतिकर्तव्यबोधकप्रकारः इति वा,शुभाशुभनिदर्शकाः इति वा, समग्रस्य मानवजीवनस्योन्नायकाः इति वा,जगद्धितसंपादका वा,भारतीयाचारविचारसंचारका वा, सुखशान्तिप्रदायका वा,आनन्दसाधका वा,सत्यतायाः सभ्यतायाः सरणयःकलाकलापप्रेरका वा, परमाशायाः आश्रया वा,चतुर्वर्गावाप्तिसोपानस्वरूपा वा सन्तीति निर्णीतम् महामनीषिभिः आचार्यप्रवरैः।वस्तुतः वेदः त्रयी एव। आम्नायः श्रुतिः इत्यादिशब्देन अभिधीयते लोके

अयम् वेदः।भगवान् बादरायणो कृष्णद्वैपायनो वेदव्यासाभिधानेन वेदान् चतुर्धा विव्यास। वेदोक्ततत्वप्रपञ्चः एव रामायणभारतविष्णुपुराणादयः एव।वेदोक्ततत्वप्रपञ्चनम् पुराणादिषु आख्यानव्याख्यानरूपेण महर्षिभिः कृतम्।तदर्थम् उक्तम् सर्वज्ञानमयो हि स इति।अयम् वेदः साक्षात् धर्मलक्षणम् वक्ति इति मनुना उद्घोषितम्। “वेदः स्मृतिःसदाचारः स्वस्य च प्रियमात्मनः। एतच्चतुर्विधं प्राहुः साक्षात् धर्मस्य लक्षणम् ।।“ इति(मनु-२-१२) अस्य विनियोगविषये मनुः प्रबोधयति अस्मान् एवम्।

“श्रुतिस्मृत्युदितं धर्मम् अनुतिष्ठन् हि मानवः। इहकीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम्।।“ (मनु-२-९) इति। धर्मविषयकचिन्तायाम् परमकर्तव्यविचारणे च आम्नायाः एव परमम् प्रमाणम् इति। पौनःपुन्येन सूचयति मनुः धर्मजिज्ञासमानानाम् परमम् प्रमाणं श्रुतिः इति।समग्रस्य मनुकुलस्य हितकामनया वेदः सर्वदा सर्वथा अस्मान् बोधयति,प्रबोधयति च। वेदानुशीलनम् वेदाङ्गानाम् अवबोधेन एव भवति।शिक्षा कल्पो व्याकरणं निरुक्तं छन्दः ज्योतिषमिति तानि च अङ्गानि भवन्ति। वेदेषु मुख्यतया इमे भागाः समालक्ष्यते। ते च विभागः संहिता आरण्यकम् ब्राह्मणम् उपनिषदिति समालक्ष्यते।

प्रत्येकस्यापि वेदे इमे अंशाः समुपलभ्यते।संहितासु मन्त्राणाम् विवरणम् अथवा मन्त्राणाम् समूहः।ब्राह्मणेषु कर्मकाण्डस्य विनियोगः आरण्यके उपासनानाम् उपव्याख्यानम्  ज्ञानकाण्डस्य उल्लेखःऔपनिषददर्शने च समालक्ष्यते। एवम् सामान्यतः मनीषिभिः व्यवस्था कृता वर्तते। विशेषतः अस्मिन् लेखने विप्रकीर्णानाम् ब्राह्मणभागानाम् प्रयोजनमधिकृत्य किञ्चित् उपस्थाप्यते एवम्। वस्तुतः ब्राह्मणशब्दः ग्रन्थवाचित्वेन परिदृश्यते नपुंसके।ब्राह्मणं ब्रह्मसंघाते वेदभागे नपुंसकम् इति। ब्राह्मणम् नाम कर्मणः तन्मन्त्राणां च व्याख्यानग्रन्थः इति कथयति भट्टभास्करः ।वाचस्पतिमिश्राः अभ्यपगच्छन्ति एवम्

नैरुक्त्यं यस्य मन्त्रस्य विनियोगः प्रयोजनम्।

प्रतिष्ठानं विधिश्चैव ब्राह्मणं तदिहोच्यते ।।इति।

अनेन अभिप्रायेण अवगम्यते यत् वदः द्विविधः मन्त्ररूपो ब्राह्मणरूपश्च इति।अर्थात् सिध्यति अयम् वेदभागः ब्राह्मणम् इति।वेदशेषभूताः ब्राह्मणभागाः इमे यज्ञानुष्ठानानाम् विवरणम् कुर्वन्ति इति। प्रत्येकं वेदशाखानुसारेण ब्राह्मणा आरण्यकग्रन्थाश्च भिन्नाः भवन्तीति। वेदवाङ्मये अयम् ब्राह्मणभागः नितान्तं विशालं व्यापकं च द्योतते।

सामान्यतः ब्राह्मणभागः ब्राह्मणग्रन्थभागेषु गद्यभागानाम् मध्ये विप्रकीर्णतया पद्यभागाः समुपलभ्यन्ते।ते स्वगतैरेव स्वभावविशेषैः स्वेषां प्राचीनत्वम् अवधारयन्ति।एतेषाम् ब्राह्मणग्रन्थानाम् सगर्भ्य एतद्रङ्गीयः सविशेषस्मरणार्हो ग्रन्थः कश्चित् सुपर्णाध्यायः।स च वैदिकसूक्ताविर्भावरङ्गसमाप्तेः परम् वैदिकसूक्तच्छायानुकारेण विरचितः इति प्रतिभाति।यतो हि तत्र बाहुल्येन प्राचीनानाम् प्रयोगविशेषाणाम् स्वरसम्प्रदायस्य च दर्शनात्  तस्य प्राचीनत्वम् प्रतीयते। तथापि स एव ग्रन्थः सर्वात्मना वेदभाषारीतिमनुकर्तुमशक्नुवानः अर्वाचीनतैकसुलभान् स्वभावविशेषाननुवर्तमानश्च आत्मनः कृत्रिमतामर्वाचीनताम् च व्यनक्ति।तस्मिन् एव रङ्गे ततः पश्चात् आरण्यकानि उत्पन्नानि।ब्राह्मणग्रन्थान्तरभावित्वमेषाम् तत्तद् ब्राह्मणग्रन्थेषु अन्तावयवतया संघटनात् सविशेषमीश्वरास्तित्ववादपुरस्करणाच्च निश्चीयते।कर्मातिगानाम् वानप्रस्थाश्रमीणामेव तदध्ययनाधिकारात् तानि आरण्यकशब्देनाभिधीयन्ते।ततः पश्चात् उपनिषदः समुत्पन्नाः स्युः इति केषाञ्चित् विमर्शकाणामाशयः

इति ओल्डन्बर्गाचार्यप्रभृतीनामाशयः। साम्प्रदायिकानाम् अस्माकम् सनातनभारतीयानाम् आशयमवलम्ब्य किञ्चित् एवम् प्रस्तूयते।तद्यथा-प्राचीनश्लोको एकः शाबरभाष्ये समालक्ष्यते। तत्र ब्राह्मणेषु दशवस्तूनाम् निर्देशस्तु स्पष्टतया कृतो वर्तते इति। तद्यथा-हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः। परक्रिया पुराकल्पो व्यवधारणकल्पना।।

उपमानं दशैते तु विषयो ब्राह्मणस्य तु।(शाबरभाष्यम्-२-१-८)इति। ब्राह्मणग्रन्थाः असंख्याता स्सन्ति।परन्तु अद्योपलभ्यमानग्रन्थाः अत्यन्तम् न्यूनसंख्याकाः भवन्ति।गृह्यसूत्रेषु बहूनाम् ब्राह्मणग्रन्थानामुल्लेखो दृश्यते।तत्र ब्राह्मणग्रन्थदृष्टारः ये सन्ति तेषां नामोल्लेखो अपि तत्र उपलभ्यते।कुत्रचित् ऋषिनामानि दृश्यन्ते ।अन्यत्र तत्तु पुराणेषु वंशब्राह्मणाभिधानेन श्रूयते।विविधवेदशाखासु पृथक्तया गृह्यसूत्रेषु च केषाञ्चित् ब्राह्मणग्रन्थानाम् उल्लेखः दृश्यते।उदाहरणार्थम् आश्वलायनगृह्यसूत्रे(३-३) एवम् समालक्ष्यते के च आचार्याः,के च ऋषयःइति। तयोःवैलक्ष्यण्यम् किम् इति जिज्ञासा कृता वर्तते।अनन्तरम् तत्रैव समाधानम् प्रदर्शयन्तिआश्वलायनाचार्याःएवम् ।मन्त्रदृष्टारः ऋषयः,ब्राह्मणदृष्टारः आचार्याः इति। आचार्यतर्पणप्रकरणप्रसङ्गे आचार्याणाम् गणत्रयम् तैः प्रादर्शि। १)माण्डूकेयगणो एकः२)द्वितीयः शाङ्कायनगणः ३)तृतीयस्तावत् आश्वलायनगणः इति। ते च अत्र कथयन्ति । तेषां नामानि एवम् समालक्ष्यते । तद्यथा-कहोलः, कौशीथकः, महाकौशीथकः, भरद्वाजः, पैङ्ग्यः, महापैङ्ग्यः, सुयज्ञः, शाङ्खायनः, ऐतरेयः, बाष्कलः, शाकलः, गार्ग्यः, सुजातवक्रः, औदवाही, सौजामी, शौनकः, आश्वलायनः इति।इमानि नवीननामानि अन्यत्र नोपलभ्यन्ते। लोके तावत् शाङ्खायनब्राह्मणम् कौशीथकब्राह्मणमित्येव प्रसिद्धम् वर्तते।अत्र तु विभिन्नतया तेषां नामानि पृथक्तया उल्लिखितानि । कशीथको अन्यः शाङ्खायनः अन्यः इति।अनयोः पृथक्तया तर्पणम् क्रियते।परन्तु निश्चयेन वक्तुम् शक्यते शाबर- शाङ्करभाष्येषु उल्लिखतत्वात् शाङ्खायनैतरेयौ ब्राह्मणदृष्टारौ इति। ऋग्वेदीयशाङ्खायनगृह्यसूत्रेषु तर्पणप्रकरणेषूपलभ्यमानानाम् आचार्याणां मध्ये जातूकर्ण्य,शाकपर्णी,गौतमाद्याचार्याणाम् नामानि सन्ति।अन्ते तर्पणप्रसङ्गे लिखन्ति "ये चान्येप्याचार्यास्ते सर्वे तृप्यन्तु तृप्यन्तु "इति।अनेन अस्माभिरवगन्तुं शक्यते यत् पाणिनिसूत्रस्याधारेण बहूनि प्राचीनब्राह्मणग्रन्थरत्नानि अद्य लुप्तप्रायाणि इति। केवलम् नाम श्रवणम् तेन भवति ग्रन्थास्तु लुप्ताः इति।अद्यत्वे तु के ब्राह्मणग्रन्थदृष्टारः, के मन्त्रदृष्टारः ऋषयः आसन्निति ज्ञातुम् नशक्यते।अद्योपलभ्यमानगृह्यसूत्रेषु कुत्रचित् तेषाम् आचार्याणाम् नामान्यपि न दृश्यन्ते।तर्पणप्रसङ्गे वा नामोल्लेखः न कृतो वर्तते।कुत्रचित् केवलम् ऋषिगणनामानि दृश्यन्ते।केवलम् गोबिलगृह्यसूत्रे आचार्यतर्पणसन्दर्भे ऋषितर्पणस्योल्लेखः कृतो वर्तते परं नामोल्लेखः न कृतः इति भाति।अत्र तु अयम् विशेषो दृश्यते सामवेदीयसमस्तर्षिगणोल्लेखःकृतः एवम् आचार्याणाम् नामानि च उल्लिखितानि वर्तन्ते।

शुक्लयजुर्वेदीये पारस्करसूत्रे एवम् आपस्तम्बसूत्रे च आचार्याणाम् नामोल्लेखःऋषीणाम् पृथक् नामोल्लेखः स्पष्टतया कृतः इति विज्ञायते।हिरण्यकेशीये सूत्रे अयम् विशेषः प्रदर्शितः ऋष्याचार्यगणोल्लेखपुरस्सरम् ऋषिपूजाविधानम् पृथक्तया दर्शितो वर्तते। वसिष्ठगौतमाद्याःसप्तर्षयःप्रसिद्धाःसन्ति तेषु अगस्त्यः ऋषिर्वा आचार्यो वा इति काचित् जिज्ञासा कृता।एवम्  एतेषाम् आचार्याणाम् कृते प्रथगासनानि तर्पणसन्दर्भे कल्पनीयानि भवन्ति ते च आचार्याःकृष्णद्वैपायनजातूकर्ण्यगौतमवामदेवपराशराः इति।अन्ये च इमे पदपाठकाः(तैत्तिरीयाः) भवन्ति

- वैशंपायनपलिङ्गुतितित्तिर्युखात्रेयाः इति एतेषां पृथगासनम् परिकल्पनीयमिति शिष्टाचारः इति।अन्यच्च कौण्डन्यो भाष्यकारश्चेति विभावनीयम् तस्य पृथगासनम् इति।ब्राह्मणग्रन्थेषु प्रधानो विचारः विधिरिति गीयते।स च विधिः अनेकधा इति ताण्ड्यब्राह्मणे (६-७) लिखितम् वर्तते।बहिष्पवमानस्य विधिः चर्चितः।अध्वर्युः,प्रस्तोता,उद्गाता,प्रतिहर्ता तथा ब्रह्म एते पञ्च ऋत्विजः क्रमशः एकस्य पुरतः एकः पाणिं गृहित्वा प्रसृवणम् कुर्यात् इति।

अत्र दृश्यमानो विधिः शनै शनै पदक्षेपः,तूष्णीभावः,पङ्क्तिबद्धगमनम,स्वहस्ते किञ्चिद्धृत्वा गमनम् एवम् विधिरुक्तः इति।यदि कदाचित् पङ्क्तिभङ्गो भवति चेत् तदा प्रत्यवायः भवति अनर्थस्य सम्भावना वर्द्धेत इति।तदर्थम् विधिःउक्तः।

एवम् शतपथब्राह्मणे अपि विधिविचारः कृतः,तत्र तु विविधविधिविधानानाम्  एको विशालो समूहःउपस्थापितः।ब्राह्मणारम्भे एव प्रथमे काण्डे दर्शपौर्णमासादीनाम् मुख्यस्य अवान्तरस्य च अनुष्ठानवर्णनम् यागक्रमेणैवोपस्थापितमस्ति। द्वितीये काण्डे तु-आधानपुनराधानाग्निहोत्रोपस्थानाग्रायणदाक्षायणादियज्ञानाम् वर्णनम् सविस्तरेण कृतम् ।विधिना सहैव हेतोरपि सयुक्तिकम् वर्णनम् कृतमस्ति।शतपथब्राह्मणस्य आरम्भे एव सहेतुकविधेः निर्देशः समुपलभ्यते।पौर्णमास्एष्ट्याम् दीक्षितो व्यक्तिः आवहनीयगार्हपत्याग्नयोर्मध्ये पूर्वस्यां दिशि स्थित्वा जलस्य स्पर्शम् करोति।अस्य जलस्पर्शस्य कारणं किम्? जलम् मेध्यम् भवति तदा यज्ञोपयोगी पदार्थो भवतीति।मिथ्यावादीजनः यज्ञाय नोपयुक्तो भवेदिति।अतः जलस्पर्शकर्म भवति अनेन अयम् पूतो भवति।जलस्पर्शेनासौ पापमपहाय मेध्यो भवति।दीक्षितो भवति।तदर्थम् जलस्पर्शविधिः। ब्राह्मणेषु  मन्त्राणां विनियोगः अधिकतया दृश्यते।कस्य मन्त्रस्य उपयोगो वा प्रयोगो वा कुत्र कस्मिन्नुद्देशकृतः् भवति।अस्य सयुक्तिकव्यवस्था ब्राह्मणेषु संलक्ष्यते।

गृह्यसूत्रे गोबिले सूत्रमिदम् सूच्यते " विधायकम् वाक्यम् ब्राह्मणम् "इति।याज्ञिकप्रक्रियाज्ञानम् अत्र प्राधान्यतया प्रस्तूयते।अनेन यज्ञसम्बन्धीप्रक्रियामहत्वम् तत्र परिदृश्यमानसन्देहपरिहारःकालादिनिर्णयः विधिवाक्यानाम् मार्गोपदेशश्च विव्रीयते। एवम् निर्णेतुम् वयम् शक्नुमःसंहितासु स्तुतिप्राधान्यम्,ब्राह्मणेषु

विधिप्रावधानम् दत्तम् इति।मीमांसकाः अपि एवमेव अभिप्रयन्ति।यानि हेतुनिन्दार्थवादादिवाक्यानि सर्वाण्यपि अवान्तरविषयोपस्थापनपुरस्सरम् उपोद्भलकतया विधिम् समर्थयन्ति।तदर्थम् इतिवृत्तानाम् आख्यानानाम् प्रामाण्यकथनम् तत्र तत्र प्रदर्शितम् महर्षिभिः।अनेन यज्ञयागादौ श्रद्धा वर्धिता भवेदिति तेषाम्आशयः।एवम् काचित् परम्परा प्राचीनकालात् समागता सा तु निरुक्ति-स्तुति-आख्यान-हेतुवचनत्वेन दृढीकृता च वर्तते शाबरभाष्ये।

हेतुनिरूपणे इदमत्र उदाहरणम् "अमेध्यो वै पुरुषः यदनृतं वदति,तेनपूतिरन्तरतः। मेध्या वा आपः। मेध्यो भूत्वा व्रतमुपायानीति।पवित्रं वा आपः।पवित्रपूतो व्रतमुपायानीति।तस्माद्वा अपःउपस्पृशति" (शतपथब्राह्मणम् १-१-१-१)इति। यानि ब्राह्मणानि सन्ति तानि मन्त्राणां विनियोगार्थम् उपयोक्तव्यानि भवन्ति।तत्र सयुक्त्या कालनिर्देशप्रतिपाद्यविषयाः। पुराणेषु कुत्रचित् एवम् उल्लेखो दृश्यते।पुराक्रिया अन्या,पुराकल्पो अन्यः इति।अत्र मतैक्यम् नास्ति। अन्यस्यान्यस्य चोक्तिर्या बुधैः प्रोक्ता पुरा कृतिः। यो ह्यत्यन्तपरोक्षार्थः स पुराकल्प उच्यते।।(ब्र,वै, पु,२-३४।६३-६४ द्वि भा)

श्रीमता राजशेखरेण इमौ द्वौ इतिहासस्य प्रभेदौ इति कथितौ। साहित्यशास्त्रस्य वचनानुसारेण यस्याम् कथायाम् एकमेव नायको भवति सा परिक्रया इति निगद्यते।यथा श्रीमद्रामायणम्।यत्र बहुनायकाः भवन्ति सा कथा पुराकल्प इति कथ्यते।यथा महाभारतम्।अनयोरुभयोःसमावेशो अत्र आख्यानस्य अन्तर्गते भवति। किञ्चात्र प्रमुखता तु विधिरेव प्राप्नोति।अन्यविषयस्तु तदङ्गत्वेन तन्निर्वाहकत्वेन च गौणरूपमेवास्ति इति।ब्राह्मणग्रन्थे विहितयज्ञियानुष्ठानानाम् इदृशी विशाला राशिस्तथा बृहत्स्तूपः प्रस्तुतो अभवत् यत् तेषां यथार्थरूपेण ज्ञातुम् तथा समुचितरीत्या अनुष्ठानम् कर्तुमेकम् दुष्करो व्यापारो अभवत्।फलतः अनुष्ठाने सौकर्याय कालान्तरे श्रौतसूत्राणाम् उत्पत्तिरभूत्।

एवम् ब्राह्मणानि विभक्तानि भवन्ति। ऋग्वेदे- ऐतरेयब्राह्मणम्,शाख्यायनब्राह्मम्, शुक्लयजुर्वेदे- शतपथब्राह्मणम्, तैत्तरीयब्राह्मणम् कृष्णयजुर्वेदे। ताण्ड्यम्, षड्विंशं सामविधानब्राह्मणे, आर्षेयम्, दैवतम्, उपनिषद्ब्राह्मणम्, संहितोपनिषद्ब्राह्मणं, वंशब्राह्मणम्, जैमिनीयब्राह्मणम् सामशाखाब्राह्मणम् गोपथब्राह्मणम् अथर्ववेदीयम् ब्राह्मणम् इति ज्ञायते।

शतपथब्राह्मणम् अतिविसृतम् वर्तते।कुत्रचित् ब्राह्मणेषु ऋषिगणस्य वंशानुचरितम् अपि समालक्ष्यते।

एवम् विचार्यमाणे सति इमानि यानि वेदोक्तब्राहमणानि सन्ति तानि कर्मकाण्डस्य विनियोगभूतानि उपासनाकाण्डस्य व्याख्यारूपाणि ज्ञानकाण्डस्य तत्वप्रबोधकानि च भवन्ति इति ज्ञायते।अर्थात् काण्डत्रयस्यापि वेदस्य समग्रस्य तत्वविस्तारकाणि ब्राह्मणानि विराजन्ते।ब्राह्मणग्रन्थबलेनैव वस्तुविषयावधारणम् सम्यग्भवति इति शम्।

**आकरग्रन्थाः**

- वैदिकसाहित्यचरित्रे कन्नडग्रन्थः, प्रा,एन्,एस्,अनन्तरङ्गाचार्, प्रसारङ्गः मानसगंगोत्री मैसूरु विश्वविद्यानिलयः
- शाङ्करवेदान्ततत्वमीमांसा, डा,के,पि,सिंन्ह, संसकृतविभागः, गौहाति विश्वविद्यालयः, सन्मतिमुद्रणालयः वाराणसि
- अमरकोशः, महामहोपाध्यायः एन् रङ्गनाथ शर्मा, काव्यालयः जयनगरम् मैसूरु
- मनुस्मृतिः, समाजपुस्तकालयः धारवाडः।
- अद्वैतदर्शनम्, चिदंबरानन्दः, अद्वैतप्रकाशनम् धारवाडः।
- संस्कारविधिः, आर्यसमाजः, नेरळकट्टे।
- धर्मसंहिता, श्रीमाता,भारतीनगरम् श्रृङ्गेरी।
- वेदाङ्गब्राह्मणगळु मत्तु आरण्यकगळु, परागः, समाजपुस्तकालयः धारवाडः
- सुनीतिसुधानिधिः, कर्नाटककालेज् धारवाडः